# shrIbAlAShTottarashatanAmastotram 5

# श्रीबालाष्टोत्तरशतनामस्तोत्रम् ५

## Document Information

Text title : bAlAShTottarashatanAmastotram 5

File name : bAlAShTottarashatanAmastotram5.itx

Category : aShTottarashatanAma, devii, dashamahAvidyA, devI

Location : doc_devii

Proofread by : PSA Easwaran

Description-comments : Balasaparya

Latest update : August 23, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# श्रीबालाष्टोत्तरशतनामस्तोत्रम् ५

अम्बा माता महालक्ष्मीः सुन्दरी भुवनेश्वरी ।
शिवा भवानी चिद्रूपा त्रिपुरा भवरूपिणी ॥ १
भयङ्करी भद्ररूपा भैरवी भववारिणी ।
भाग्यपरदा भावगम्या भगमण्डलमध्यगा ॥ २
मन्त्ररूपपदा नित्या पार्वती प्राणरूपिणी ।
विश्वकर्त्री विश्वभोक्त्री विविधा विश्ववन्दिता ॥ ३
एकाक्षरी मृडाराध्या मृडसन्तोषकारिणी ।
वेदवेद्या विशालाक्षी विमला वीरसेविता ॥ ४
विधुमण्डलमध्यस्था विधुबिम्बसमानना ।
विश्वेश्वरी वियद्रूपा विश्वमाया विमोहिनी ॥ ५
चतुर्भुजा चन्द्रचूडा चन्द्रकान्तिसमप्रभा ।
वरप्रदा भाग्यरूपा भक्तरक्षणदीक्षिता ॥ ६
भक्तिदा शुभदा शुभ्रा सूक्ष्मा सुरगणाचिता ।
गानप्रिया गानलोला देवगानसमन्विता ॥ ७
सूत्रस्वरूपा सूत्रार्था सुरवृन्दसुखप्रदा ।
योगाप्रिया योगवेद्या योगिहृत्पद्मवासिनी ॥ ८
योगमार्गरता देवी सुरासुरनिषेविता ।
मुक्तिदा शिवदा शुद्धा शुद्धमार्गसमर्चिता ॥ ९
ताराहारा वियद्रूपा स्वर्णताटङ्कशोभिता ।
सर्वलक्षणसम्पन्ना सर्वलोकहृदिस्थिता ॥ १०
सर्वेश्वरी सर्वतन्त्रा सर्वसम्पत्प्रदायिनी ।
शिवा सर्वान्नसन्तुष्टा शिवप्रेमरतिप्रिया ॥ ११
शिवान्तरङ्गनिलया रुद्राणी शम्भुमोहिनी ।
भवार्धधारिणी गौरी भवपूजनतत्परा ॥ १२
भवभक्तिप्रियाऽपर्णा सर्वतत्त्वस्वरूपिणी ।

त्रिलोकसुन्दरी सौम्या पुण्यवर्त्मा रतिप्रिया ॥ १३॥

पुराणी पुण्यनिलया भुक्तिमुक्तिप्रदायिनी ।
दुष्टहन्त्री भक्तपूज्या भवभीतिनिवारिणी ॥ १४॥

सर्वाङ्गसुन्दरी सौम्या सर्वावयवशोभिता ।
कदम्बविपिनावासा करुणामृतसागरा ॥ १५॥

सत्कुलाधारिणी दुर्गा दुराचारविघातिनी ।
इष्टदा धनदा शान्ता त्रिकोणान्तरमध्यगा ॥ १६॥

त्रिखण्डामृतसम्पूज्या श्रीमत्त्रिपुरसुन्दरी ।
स्तोत्रेणानेन देवेशीं विधुमण्डलमध्यगाम् ।
ध्यायेज्जपेन्महादेवीं बालां सर्वार्थसिद्धिदाम् ॥ १७॥

इति श्रीबालाष्टोत्तरशतनामस्तोत्रं (५) सम्पूर्णम् ।

Proofread by PSA Easwaran

---

*shrIbAlAShTottarashatanAmastotram 5*

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*